
# ।।मृत्युरहितमहज्जीवनम्।।

## (THIRUARUTPA-DEATHLESS GREAT LIFE)

SANSKRIT LANGUAGE



GLASCOW PRINTING CO HOWRA

**अनुग्रहरूपमहज्ज्योतिः अनुग्रहरूपमहज्ज्योतिः।**

**अद्वितीयकरुणाज्योतिः अनुग्रहरूपमहज्ज्योतिः।**

1. स्मरणे स्मरणे आस्वादनेन त्वं

पूरित बाष्पजलेन सिञ्चित तनुः

तवानुग्रहामृतमेव शुभनिधि सैव

ज्ञान नर्तनं कुर्वन् मम धीरोदात्तमेवेति

स्तुवन् स्तुवन् कुर्म नमस्कारं आगच्छन्तु लोकजनाः!

मृत्योर्विना महज्जीवनं भवत्येव पश्यन्तु!

नास्त्यतिशयोक्तिः नास्त्यनृतम् सत्यमेतत् वच्मि

हिरण्यसभासूक्ष्मसभाप्रवेशतरुणमेतदेव।।

2. प्रवेशसमयमेतदेव हे प्रियजनाः। स्वयमेव

वदाम्येतत् नास्त्यसत्यवचनानि मम

प्राणनिर्गलितसमये बन्धुजनाः स्वकीयाः अन्याः

अलौकिकवस्तूनां संसर्गः न भवत्येव

हे अत्यन्त इष्टेक्षुरस! दाडिमफल! शिखरमधु!

अनर्घमणि! श्लाघनीयवस्तु! सत्फलित!

समुचिताद्वितीयमहत्पते! दयानिधे! त्वमेव

गतिः सत्यमिति सम्भाव्य अर्चनेन भक्त्या नमस्कुर्वन्तु।।

3. हे लोकजनाः! विनम्रपूरितमस्तकैः नमस्कारहृदयेन

गीयताम् हे परम्पर! चिदम्बर! परापर! वर!

खण्डितेनागतशुध्दवेजान्तानुभवरूप!

तुरीयशिखरानुभवकारक! शुद्धसिद्धान्तसहित

अद्वैतस्थितिमहत्सुखदात! समरससन्मार्ग

सत्यप्रदात! प्रकृतिनिजतत्वेकैकपतीति

परिपक्वमनसा स्थिरबुद्ध्या कृतस्तवनेन

तत्क्षणेन अदृश्यदृश्यानिसर्वाणि ...द्रक्ष्यन्ते आगच्छन्तु।।

4. दृष्टं सर्वम् अनित्यम् शृतम् सर्वम् अशास्त्रम्

पठनसर्वम् अनृतम् वृथा एव।

भुक्तपदार्थम् मलमेव। भाव्यमानं लोप एव

हे लोकजनाः! एतावता न ज्ञायते किम्?

वचने किम्? इतः त्वं समरससन्मार्ग

सत्यमार्गाचरणेन सत्यवस्तुम् अनुभवेन विज्ञाय

सूक्ष्मालये स्थित स्वामिनः अनुग्रहं प्राप्नोतु

मरणरहितवरं प्राप्नुयाम आनन्दम् अनुभवाम।।

5. सुखामो सर्वलोकैस्तूयमानेन जीवामो

सर्वसमर्थसिद्धि, दैवत्वम् प्राप्स्यामः।

हे प्रियजनाः! आगच्छन्त्वत्र समरससन्मार्गप्रापणेन

अन्तः स्वरूपमत्र हिरण्मयस्वरूपमिव परिवर्त्य

द्रवीकृत स्वर्णप्रकाशस्य प्रकाशस्य प्रकाश! ज्ञानामृत!

हे ज्ञानपूरण! वेदान्तार्थशिखरस्यार्थरूप!

दुष्टजनैः प्राप्यमानानर्घ्यमणि! सूक्ष्मसभायाः

महौषध! एवं स्तवने सर्वाणि पापानि विनश्येयुः।।

6. मलिनसर्वं स्वच्छमिति भूरिमनसा अनुग्रहेण

बालाय अनुग्रहामृतं ज्ञानप्रदानेन समर्थरूप

विगलित मृत्युः प्रकृत्यानन्दानुभव स्वरूपालये

प्रतिष्ठितानुग्रह महज्जोतिं

करुणास्वाभावेन हृदयपूरित

एकवस्तुं! महत्करुणापति प्राप्य

मृत्युरहित क्षेमं प्राप्स्यामः। हे लोकजनाः!

शुभतरुणमेतदेव। अत्यन्तशीघ्रमेवागच्छन्तु।।

7. कोऽपरः? नास्त्यहं वा तव मित्रम्?

बृहद्वचनानि वच्मि परन्तु नास्त्यनृतवचनानि?

शरणदानेन, अनुग्रहामृतदानेन च माम् महत्कृत्वा

अद्वितीयमहत् सुखदातरूपेण एकैकमहत्पतिः

शुभेऽस्मिन् अवसरे धृत्वा पवित्रदेहं

सिद्धलीला करुणमहद्दिनं अस्त्येव

एतदेव शुभसमयम्। आगच्छन्त्वत्र हे लोकजनाः!

उपगम्य सर्वं भावितमिव प्राप्स्यन्तु शीघ्रमेव।।

8. झटिति झटिति प्राप्स्यामः मेदनीजनाः! अत्र

सत्यमेव भाष्यते मया नान्यथा भाव्यम्

वृध्दावस्थात् यौवनावस्थां प्रापणे

मृत जना अपि पुनरुज्जीवनेन लीलाकर्तुं

शीघ्ररूपेण सर्वकार्यकरणसमर्थप्रभुः, सिध्द्धपुरुषः

आगमनसमयमेतदेव। वरं प्राप्स्यामः।

रुदन् रुदन् दुःखाश्रुभिः द्रवीकृतमनसा

करुणानर्तनरुपभगवन्तं हृदये स्थापयन्तु
आनन्देन ।।

9. आनन्देन चिरकालं लोके

जीवनं दातुं समर्थानुग्रहज्योतिः भगवतागमन

समयः स्पष्टं तथा नास्तीति न भावयतु। एतदेव।

मृतजनान् उत्थानहठात् समय एतदेव। हे
लोकजनाः!

गोप्यभाषणं नास्ति, यथार्थग्रहणेन वदन्नस्मि।

सूक्ष्मालये मम पित्रा दीयमानानुग्रहं

जिगीषाशीला आगच्छन्तु हे प्रियमित्राणि ।।

10. इच्छाऽस्ति तर्हि आगच्छन्त्वत्र!
अनुग्रहमहज्ज्योतिः,

महत्पुरुषः, मातेव पितेव अनुग्रहदाता, करुणामूर्तिः

दोषनिष्कार्षणेन मामुपनीय वरदानेन

सर्वसमर्थः, सिद्धपुरुषः ममप्राणे लीनोऽस्ति।

प्रकाशसहजानुग्रहमहत्नर्तनं कर्तुं

निष्कलङ्कमनसा अनुग्रहस्य प्रत्यक्षशुभसमयः
एतदेव।

छलनभाषणमिति मा भावय! मा भ्रमय! हे
लोकजनाः!

आगच्छन्तु त्रिकालेषु नाशनरहितवरं प्राप्तुम्।।

11. हे लोकजनाः। शुभतरुणमेतदेव पश्यन्तु!

अनुग्रहमहज्ज्योति महत्पति मम
पितुरागमनसमयः

अपुर्वदैवामृतम् आनन्देन अनुगृहीतम् मह्यम्।

भवद्भिः पुर्वं अदृश्यदर्शन समयः एतदेव

सन्देहपूरितहृदयेन मा भ्रमय! ममैव सुखं
प्राप्नुवन्तु।

आवयोः भेदं विना वच्म्यहम्

छिद्रमतान्धकूपात् बहिरागत्य सत्यं जानन्तु

नाशनरहितमार्गं सन्मार्गं विज्ञाय आगतोऽहम्।।

12. पवीत्रमार्गमेकमेव समरससन्मार्गं

शिवमार्गमिति विज्ञाय हे लोकजनाः! आगच्छन्तु!

मार्गेऽस्मिन् मामनुगृह्य आनुग्रहामृतदानेन

करुणामूर्तिः, शक्तिप्रदाता, दिव्यमूर्तिः

महत्मार्गे लीलाः कृत्वा स्वच्छमनसा अनुग्रहदाता

महत्करुणास्वरूपेण आगमनसमयमेतदेव।

दुष्टमार्गवर्तिनः इव मा संचर! मा चञ्चल!

तीक्ष्णबुद्ध्या एकाभिप्रायेण सत्यमेव वदामि।।

13. उच्यते तत् सत्यमेव। अत्रागत्य वसन्तु
लोकजनाः!

मयि सन्देहो मास्तु त्यज आस्तिरत्वम्।

सामान्यतया मा भावयतु। सर्वसमर्थः

मयि स्थित्वा वदन्नस्ति श्रूयताम् सावधानेन
भवन्तः।

स्पष्टतया शुद्धशिवसन्मार्गम्

आचरित्वा शीघ्रं ज्ञानं प्राप्यताम्। सत्यजीवनं दातुं

दर्शनभाग्यः एकैकवैशिष्ट्यरूपः भगवान् इति

स्तूयमानो करूणानिधेः आगमनसमयः एतदेव।।

14. स्वयं ब्रह्माण्डः स एव सर्वरहितरूपेण

एकैकपतित्वेन स्थित्वा मम पितरौ

आकाशः, आकाशमूलं, आकाशमूलस्य प्रारम्भः एव

करुणाप्रभुः इति भक्तानां अन्तरङ्गे स्थित

मधुरम्! दाडिमपाकत्वेन श्वेतामृतम्

सूक्ष्मसभायां महज्जीवनाय ध्यानं कुर्वन्तु। हे
लोकजनाः!

जातशरीरं नाशं न प्राप्स्यति। प्रति प्रलयकाले
पूजार्ह

अत्यन्तमहत्सिद्धिं प्राप्स्यन्ति
सत्यमेतद्वचनम्।।

15. सत्यवेदान्तस्सर्वं, सिद्धान्तस्सर्वं

ज्ञातपूर्वज्ञाने स्वयं यथार्थज्ञानम् अपूर्वम्

नित्यसूक्ष्मसभामध्यभागे पूर्णनर्तनं क्रियमाण

नित्यपरिपूर्ण नरशीखामणिं

तादृशमहतापतिं अनर्घौषधम् सर्वज्ञस्य

आत्मानम्, मम आत्मनि प्रतिष्ठित दयानिधिं

शक्तिं सर्वं दत्तशिवकतिं हे लोकजनाः! ध्यानं कुर्वन्तु। स्तवनं कुर्वन्तु पापानि सर्वाणि भीतिपूर्वतया।।

16. निन्दारहित मनसिपूर्णमहज्जयेष्ठम्

स्थिति दर्शने अनुग्रहदातारम् गुरुं

मम पितरौ मम कनीनिके

मम प्राणं भावं एकैकबुद्धिं

मम ध्यानस्य महद्रुचिं श्वेतामृतं सर्वं

करणसमर्थः एकैकप्रभुं शिवं लोकजनाः!

आदिमलम्, अन्धकारं नाशनं कर्तुं ध्यानं कुर्वन्तु!

भवताम् भयं निर्मूल्य अन्त्यकालभयमपसरतु।।

17. महत् प्रयत्नेन लक्ष्यं नोपगम्य मूढमताः सर्वे

नाशनकरणे छलनरहितः

अभ्यसित सन्मार्गः सर्वत्र स्थिरत्वं प्राप्तुं

अस्माकं स्वामिनः प्रत्यक्षशुभसमयः एतदेव पश्यन्तु!

निद्रानन्तरं शय्यात् उत्थापित इव मृत जनाः

प्रत्यक्षतया दृश्यमानसमयः प्रारम्भो जातः। भवन्तो

अभ्यस्य जानन्तु शीघ्रमागच्छन्तु! अपठित पठनम्

पठनीयम् अनुभवनीयम् प्रापणीयम् सुखं सर्वैः।।

18. भवद्भिः सुखं विना दुःखमेव साहसेन ज्ञातम् हे जनाः!

कल्मषं ज्ञातं। पवित्रं तु न ज्ञातं?

इहपरं उभयमपि न जानन्ति? किमर्थमेतत्?

मरणासन्नसमये कुत्र धावन्ति? अहो!

स्वयं अविज्ञाय हे मूढजनाः! परमात्मानं सम्यक् अवगम्य

अक्षयज्ञानं अमृतस्वरूपं दर्शनेन अनुग्रहं प्राप्स्यामः।

मम मुखमेव न जानाति वा? न जानाति वा माम्?

महाजनैः स्तूयमानपरमयोगि पुत्रः अहमेव।।

19. मया उच्यमान वचनानि नायकस्य वचनान्येव

विश्वसन्तु हे लोकजनाः! शुभतरुणमेतदेव!

आकाशेनोक्तमाणिक्यसभायां नर्तनकरणोत्तमस्य

आगमनस्य स्वागतेन तेन दत्तवरान् प्राप्तुं

मधुरमिव प्लवमान मम मनसः उत्तिष्ठामि। भवन्तः

विज्ञाय आगच्छन्तु! जाग्रतु सिद्धिं प्राप्स्यन्तु

सर्वं उपदेशितवान्। करुणया उपदेशितवान्। पश्यन्तु

मया अनुभूतानन्दं भवद्भिः अनुभोक्तुम्॥

20. प्रत्येकतया वदामि श्रूयतामेतत्। पश्यतामेतत्।

वक्रमन इव वानरात् लज्जासहित हे लोकजनाः!

कलङ्कमनस्कैः भवद्भिः अहं किमपि न इच्छामि।

मम सत्यवचनम् असत्यवचनमिव मा भावयतु।

उक्तमताः सर्वेः असत्या एव तेषु मा प्रविशन्तु!

"सिवम्" एक एव वस्तुः इति मनसि निश्चित्य

अर्चनं कुर्वन्तु। सूक्ष्मसभानर्तनं विज्ञाय स्तुवन्तु

सिद्धिं सर्वं अस्मिन्नेव दिने शीघ्रतया प्राप्नुवन्तु॥

21. मेलयन्तु ऐक्येन समरससन्मार्ग

पवित्रमार्गमेव महत्मार्गं सिद्धिप्रापणे

जानन्तु। भोक्तुं, निद्रातुं ज्ञातं। परन्तु

सर्वलोकरहस्यं तु न ज्ञातं। किमर्थम्?

जिवितकाले सर्वज्ञानकमृत्यु इत्यस्त्येकम्

अहो! मृत्युः नाम जडः क्षणकालमपि न स्थग्यते

किमेतत् सम्मतम्? प्रविशन्तु मरणं स्थगयाम।

पश्यन्तु अद्वितीयसुक्ष्मसभानर्तनं। दर्शनं कुर्वन्तु॥

22. पूर्वकृतपापं क्षमारूपेण स अनुगृह्णाति। सारूप्येन

दैविकनर्तनकरणमहत्करूणानुग्रहमूर्तेः अन्तरङ्गे

सत् ज्ञानेन ध्यानय। समरससन्मार्गं

प्राप्नोतु इति उपदेशयन्नस्मि हे भूजनाः! मां भवन्तो

अवमानितोऽपि आनन्दवचनानि इव स्वीकरोमि

मनसि न स्थापयिष्यामि गौरवं पथे त्यक्तपूर्वं।

असत्यं न जानामि सत्यमेव वदामि

भवतां पवित्रप्रापणायऽहम्॥

23. भोगभाग्याः अशाश्वताः ऐकश्वर्यं सर्वं असत्यम्।

नूतनभाषणं किमपि नास्ति। सूक्ष्मबुद्दया भवद्भिः दर्शितं

सत्यभ्रमजनाः। अन्धकारे मृत्युः नोचितम्।

मृत्युरहितमहज्जीवनं जीवितुं आगच्छन्तु अत्र।

सद्वस्तुं प्रापणे स्थिरशिवसन्मार्गं प्रविशन्तु।

सूक्ष्मसभामृतं पातुं प्रियसहित

दैवानुग्रहेण संभावितवरान् सर्वान् प्राप्स्यन्ति

त्वया आगता एव, तव निरोधकाः न सन्ति केऽपि॥

24.अनन्तरमन्तरमिति किमपि न विज्ञाय स्थितजनाः

मृत्यु इति महापापी समीपे एव तिष्ठति सदा

अहो किञ्चिदपि न स्थग्यते भवता।

समरससन्मार्गसंसर्गाः विना तम्

निरोद्धुं स्थगयितुं केऽपि न सन्ति अस्मिन् लोके।

मम वचनानि सत्यमेव हे लोकजनाः!

सर्वं क्षणभङ्गुरमिति ज्ञातपूर्वजनान्

सदा भगवत्संरक्षणे मृत्युः कदापि नैवगच्छति।।

25.मराणानन्तरं नयमानजनाः किमर्थम् आर्तनादं कुर्वन्ति।

हे जनाः! मरणरहितमहद्वरं किमर्थं न प्राप्स्यन्ति?

विस्मृतं भवद्भिः वृद्धत्वं, जरत्वं सम्मतं किम्?

कदापि यदि स्मर्यते महात्मानां मन अपि कम्पति पश्यतु।

श्रेयस्करसन्मार्ग एक एव वृद्धत्वं, मरणं

अपसरति। विज्ञाय आगच्छन्तु अत्र।

जातेऽस्मिन् जीवने नित्यसत्यजीवनं

प्राप्य महदानन्दं अनुभवामः शीघ्रं शीघ्रं।।

26. समुचितवचनमेव ऐक्येन भवन्तं

मित्रमेवाहं, नास्ति भवतां शत्रुः। हे लोकजनाः!

विद्यावन्तः, विद्यारहिताः नाशयन्त्येव सत्यमेतत्।

इन्द्रियनाशनमृत्युः किं भवतां सम्मतम्?

किञ्चिदपि मम मनः नाङ्गीकरोति। परन्तु

भवतां स्वमनः पाषाणो वा क्रूरः इति न जाने?

इदानीमेव स्थगयामो चेत् माम् अनुसरन्तु

मम पथं मृत्युनाशनसन्मार्गम्।।

27. सन्मार्गमहद्गुणवतां प्रभुं माम्

ओढ्यमानमहत्पतिं, अद्वितीयसभापतिं

सम्यक् मार्गं प्रदर्श्य सन्मार्गसंघस्य

मध्ये संस्थाप्य अनग्रहामृतदातारं नायकं

पापमार्गस्थस्य अनर्घपुण्यवन्तं ज्ञान

पूरणसत्यवस्तु इव प्रतिष्ठितमहदौषधम्

असत्यमार्गात् रक्षणं कृत्वा अनुग्रहयालये नर्तन

अनुग्रहमहज्ज्योतिं हे लोकजनाः! विज्ञातुं प्रविशन्तु।।

28. लौकिकजीवनपापेभ्यः निवारितहृदयेषु

सत्यरूपेण स्थीयमानानुग्रहोत्तमसद्गुरुं

पुरतः कृत्वा केषाञ्चिदपि न ज्ञातापूर्व

नित्याकाशवस्तुं, सर्वस्थराः स्वयमेव भूय

आरोहणानुकूलप्रकृतिसत्यम्

सर्वसमर्थं मह्यम् दत्तमहत्पतिं

एकैकबन्धुः इति प्रविशन्तु हे लोकजनाः! स्तुवन्तु। आनन्देन द्रवीकृतमनसा ध्यानं कुर्वन्तु॥

**अनुग्रहरूपमहज्ज्योतिः अनुग्रहरूपमहज्ज्योतिः।**

**अद्वितीयकरुणाज्योतिः अनुग्रहरूपमहज्ज्योतिः॥**

Translated by Dr.Sayyad Subhani from the book "Footsteps of saint Ramalingam" with permission from the author Mr B Kamalakannan. (publisher : vanathi pathippkam, 2014).
Web: http://ramalingaperumanar.com/